|| ॐ नमो भगवते वासुदेवाय ||

# श्रीमद् भागवत रसिक कुटुंब

## एकदंत शरणागति स्तोत्र

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# एकदंत शरणागति स्तोत्र

**देवर्षय ऊचुः**

**सदात्मरूपं सकलादिभूत-ममायिनं सोऽहमचिन्त्यबोधम्।**
**अनादिमध्यान्तविहीनमेकं(न्), तमेकदन्तं शरणं व्रजामः॥ 1 ॥**

**अनन्तचिद्रूपमयं(ङ्) गणेश-मभेदभेदादिविहीनमाद्यम्।**
**हृदि प्रकाशस्य धरं स्वधीस्थं(न्), तमेकदन्तं शरणं व्रजामः॥ 2 ॥**

**समाधिसंस्थं हृदि योगिनां यं, प्रकाशरूपेण विभातमेतम्।**
**सदा निरालम्बसमाधिगम्यं(न्), तमेकदन्तं शरणं व्रजामः॥ 3 ॥**

**स्वबिम्बभावेन विलासयुक्तां, प्रत्यक्षमायां विविधस्वरूपाम्।**
**स्ववीर्यकं(न्) तत्र ददाति यो वै, तमेकदन्तं शरणं व्रजामः॥ 4 ॥**

**त्वदीयवीर्येण समर्थभूत- स्वमायया संरचितं(ञ्) च विश्वम्।**
**तुरीयकं ह्यात्मप्रतीतिसं(ञ्)ज्ञं(न्), तमेकदन्तं शरणं व्रजामः॥ 5 ॥**

**त्वदीयसत्ताधरमेकदन्तं(ङ्), गुणेश्वरं यं(ङ्) गुणबोधितारम्।**
**भजन्तमत्यन्तमजं(न्) त्रिसंस्थं(न्), तमेकदन्तं शरणं व्रजामः॥ 6 ॥**

**ततस्त्वया प्रेरितनादकेन, सुषुप्तिसंज्ञं रचितं(ञ्) जगद् वै।**
**समानरूपं ह्युभयत्रसंस्थं(न्), तमेकदन्तं शरणं व्रजामः॥ 7 ॥**

तदेव विश्वं(ङ्) कृपया प्रभूतं(न्), द्विभावमादौ तमसा विभान्तम्।
अनेकरूपं(ञ्) च तथैकभूतं(न्), तमेकदन्तं शरणं व्रजामः॥ 8 ॥

ततस्त्वया प्रेरितकेन सृष्टं, बभूव सूक्ष्मं(ञ्) जगदेकसंस्थम्।
सुसात्त्विकं स्वप्नमनन्तमाद्यं(न्), तमेकदन्तं शरणं व्रजामः॥ 9 ॥

तदेव स्वप्नं तपसा गणेश, सुसिद्धरूपं विविधं बभूव।
सदैकरूपं(ङ्) कृपया च तेऽद्य, तमेकदन्तं शरणं व्रजामः॥ 10 ॥

त्वदाज्ञया तेन त्वया हृदिस्थं(न्), तथा सुसृष्टं(ञ्) जगदंशरूपम्।
विभिन्नजाग्रन्मयमप्रमेयं(न्), तमेकदन्तं शरणं व्रजामः॥ 11 ॥

तदेव जाग्रद्रजसा विभातं,विलोकितं(न्) त्वत्कृपया स्मृतेन।
बभूव भिन्नं(ञ्) च सदैकरूपं(न्), तमेकदन्तं शरणं व्रजामः॥ 12 ॥

सदेव सृष्टिप्रकृतिस्वभावात्-तदन्तरे त्वं(ञ्) च विभासि नित्यम्।
धियः(फ्) प्रदाता गणनाथ एकस्-तमेकदन्तं शरणं व्रजामः॥ 13 ॥

त्वदाज्ञया भान्ति ग्रहाश्च सर्वे, प्रकाशरूपाणि विभान्ति खे वै।
भ्रमन्ति नित्यं स्वविहारकार्यास्-तमेकदन्तं शरणं व्रजामः॥ 14 ॥

त्वदाज्ञया सृष्टिकरो विधाता, त्वदाज्ञया पालक एकविष्णुः।
त्वदाज्ञया संहरको हरोऽपि, तमेकदन्तं शरणं व्रजामः॥ 15 ॥

यदाज्ञया भूमिजलेऽत्र संस्थे, यदाज्ञयापः(फ्) प्रवहन्ति नद्यः।
स्वतीर्थसंस्थश्च कृतः(स्) समुद्रस्-तमेकदन्तं शरणं व्रजामः॥ 16 ॥

यदाज्ञया देवगणा दिविस्था, ददन्ति वै कर्मफलानि नित्यम्।
यदाज्ञया शैलगणाः(स्) स्थिरा वै, तमेकदन्तं शरणं व्रजामः॥ 17 ॥

यदाज्ञया शेषधराधरो वै, यदाज्ञया मोहप्रदश्च कामः।
यदाज्ञया कालधरोऽर्यमा च, तमेकदन्तं शरणं व्रजामः॥ 18 ॥

यदाज्ञया वाति विभाति वायुर्-यदाज्ञयाग्निर्जठरादिसंस्थः।
यदाज्ञयेदं सचराचरं(ञ्) च, तमेकदन्तं शरणं व्रजामः॥ 19 ॥

यदन्तरे संस्थितमेकदन्तस्-तदाज्ञया सर्वमिदं विभाति।
अनन्तरूपं हृदि बोधकं यस्-तमेकदन्तं शरणं व्रजामः॥ 20 ॥

सुयोगिनो योगबलेन साध्यं, प्रकुर्वते कः(स्) स्तवनेन स्तौति।
अतः(फ्) प्रणामेन सुसिद्धिदोऽस्तु, तमेकदन्तं शरणं व्रजामः॥ 21 ॥

गृत्समद उवाच
एवं स्तुत्वा गणेशानं(न्), देवाः(स्) समुनयः(फ्) प्रभुम्।
तूष्णींभावं प्रपद्यैव, ननृतुर्हर्षसंयुताः॥ 22॥

स तानुवाच प्रीतात्मा, देवर्षीणां स्तवेन वै।
एकदन्तो महाभागो, देवर्षीन् भक्तवत्सलः॥ 23 ॥

एकदन्त उवाच
स्तोत्रेणाहं प्रसन्नोऽस्मि, सुराः(स्) सर्षिगणाः(ख्) किल।
वरदोऽहं वृणुत वो, दास्यामि मनसीप्सितम्॥ 24 ॥

भवत्कृतं मदीयं यत्, स्तोत्रं प्रीतिप्रदं(ञ्) च तत्।
भविष्यति न संदेहः(स्), सर्वसिद्धिप्रदायकम्॥ 25 ॥

यं यमिच्छति तं(न्) तं वै, दास्यामि स्तोत्रपाठतः।
पुत्रपौत्रादिकं सर्वं(ङ्), कलत्रं(न्) धनधान्यकम्॥ 26 ॥

गजाश्वादिकमत्यन्तं, राज्यभोगादिकं(न्) ध्रुवम्।
भुक्तिं मुक्तिं(ञ्) च योगं वै, लभते शान्तिदायकम्॥ 27 ॥

मारणोच्चाटनादीनि, राजबन्धादिकं(ञ्) च यत्।
पठतां श्रृण्वतां(न्) नृणां, भवेच्च बन्धहीनता॥ 28 ॥

एकविंशतिवारं यः(श्), श्लोकानेवैकविंशतीन्।
पठेच्च हृदि मां स्मृत्वा, दिनानि त्वेकविंशतिम्॥ 29 ॥

न तस्य दुर्लभं(ङ्) किञ्चत्, त्रिषु लोकेषु वै भवेत्।
असाध्यं साधयेन्मर्त्यः(स्), सर्वत्र विजयी भवेत्॥ 30 ॥

नित्यं यः(फ्) पठति स्तोत्रं, ब्रह्मभूतः(स्) स वै नरः।
तस्य दर्शनतः(स्) सर्वे, देवाः(फ्) पूता भवन्ति च॥ 31 ॥

॥ इति श्रीमुद्गलपुराणे श्रीएकदंतशरणागतिस्तोत्रम् संपूर्णम् ॥

